# শ্রীপার্বতীসহস্রনামস্তোত্রম্

{॥ শ্রীপার্বতীসহস্রনামস্তোত্রম্ ॥}

হিমবানুবাচ ।

কা ত্বং দেবি বিশালাক্ষি শশাঙ্কাবযবাঙ্কিতে ।

ন জানে ত্বামহং বৎসে যথাবদ্ ব্রূহি পৃচ্ছতে ॥ ১॥

গিরীন্দ্রবচনং শ্রুত্বা ততঃ সা পরমেশ্বরী ।

ব্যাজহার মহাশৈলং যোগিনামভযপ্রদা ॥ ২॥

দেব্যুবাচ ।

মাং বিদ্ধি পরমাং শক্তিং পরমেশ্বরসমাশ্রযাম্ ।

অনন্যামব্যযামেকাং যাং পশ্যন্তি মুমুক্ষবঃ ॥ ৩॥

অহং বৈ সর্বভাবানামাত্মা সর্বান্তরা শিবা ।

শাশ্বতৈশ্বর্যবিজ্ঞানমূর্তিঃ সর্বপ্রবর্তিকা ॥ ৪॥

অনন্তাঽনন্তমহিমা সংসারার্ণবতারিণী ।

দিব্যং দদামি তে চক্ষুঃ পশ্য মে রূপমৈশ্বরম্ ॥ ৫॥

এতাবদুক্ত্বা বিজ্ঞানং দত্ত্বা হিমবতে স্বযম্ ।

স্বং রূপং দর্শযামাস দিব্যং তত্ পারমেশ্বরম্ ॥ ৬॥

কোটিসূর্যপ্রতীকাশং তেজোবিম্বং নিরাকুলম্ ।

জ্বালামালাসহস্রাঢ্যং কালানলশতোপমম্ ॥ ৭॥

দংষ্ট্রাকরালং দুর্দ্ধর্ষং জটামণ্ডলমণ্ডিতম্ ।

ত্রিশূলবরহস্তং চ ঘোররূপং ভযানকম্ ॥ ৮॥

প্রশান্তং সৌম্যবদনমনন্তাশ্চর্যসংযুতম্ ।

চন্দ্রাবযবলক্ষ্মাণং চন্দ্রকোটিসমপ্রভম্ ॥ ৯॥

কিরীটিনং গদাহস্তং নূপুরৈরুপশোভিতম্ ।

দিব্যমাল্যাম্বরধরং দিব্যগন্ধানুলেপনম্ ॥ ১০॥

শঙ্খচক্রধরং কাম্যং ত্রিনেত্রং কৃত্তিবাসসম্ ।

অণ্ডস্থং চাণ্ডবাহ্যস্থং বাহ্যমাভ্যন্তরং পরম্ ॥ ১১॥

সর্বশক্তিমযং শুভ্রং সর্বাকারং সনাতনম্ ।

ব্রহ্মেন্দ্রোপেন্দ্রযোগীন্দ্রৈর্বন্দ্যমানপদাম্বুজম্ ॥ ১২॥

সর্বতঃ পাণিপাদান্তং সর্বতোঽক্ষিশিরোমুখম্ ।

সর্বমাবৃত্য তিষ্ঠন্তং দদর্শ পরমেশ্বরম্ ॥ ১৩॥

দৃষ্ট্বা তদীদৃশং রূপং দেব্যা মাহেশ্বরং পরম্ ।

ভযেন চ সমাবিষ্টঃ স রাজা হৃষ্টমানসঃ ॥ ১৪॥

আত্মন্যাধায চাত্মানমোঙ্কারং সমনুস্মরন্ ।
নাম্নামষ্টসহস্রেণ তুষ্টাব পরমেশ্বরীম্ ॥ ১৫॥

হিমবানুবাচ ।
শিবোমা পরমা শক্তিরনন্তা নিষ্কলাঽমলা ।
শান্তা মাহেশ্বরী নিত্যা শাশ্বতী পরমাক্ষরা ॥ ১॥

অচিন্ত্যা কেবলাঽনন্ত্যা শিবাত্মা পরমাত্মিকা ।
অনাদিরব্যযা শুদ্ধা দেবাত্মা সর্বগাঽচলা ॥ ২॥

একানেকবিভাগস্থা মাযাতীতা সুনির্মলা ।
মহামাহেশ্বরী সত্যা মহাদেবী নিরঞ্জনা ॥ ৩॥

কাষ্ঠা সর্বান্তরস্থা চ চিচ্ছক্তিরতিলালসা ।
নন্দা সর্বাত্মিকা বিদ্যা জ্যোতীরূপাঽমৃতাক্ষরা ॥ ৪॥

শান্তিঃ প্রতিষ্ঠা সর্বেষাং নিবৃত্তিরমৃতপ্রদা ।
ব্যোমমূর্ত্তির্ব্যোমলযা ব্যোমাধারাঽচ্যুতাঽমরা ॥ ৫॥

অনাদিনিধনাঽমোঘা কারণাত্মা কলাঽকলা ।

ক্রতুঃ প্রথমজা নাভিরমৃতস্যাত্মসংশ্রযা ॥ ৬॥

প্রাণেশ্বরপ্রিযা মাতা মহামহিষঘাতিনী ।

প্রাণেশ্বরী প্রাণরূপা প্রধানপুরুষেশ্বরী ॥ ৭॥

সর্বশক্তিকলাকারা জ্যোৎস্না দ্যৌর্মহিমাস্পদা ।

সর্বকার্যনিযন্ত্রী চ সর্বভূতেশ্বরেশ্বরী ॥ ৮॥

অনাদিরব্যক্তগুহা মহানন্দা সনাতনী ।

আকাশযোনির্যোগস্থা মহাযোগেশ্বরেশ্বরী ॥ ৯॥

মহামাযা সুদুষ্পূরা মূলপ্রকৃতিরীশ্বরী ।

সংসারযোনিঃ সকলা সর্বশক্তিসমুদ্ভবা ॥ ১০॥

সংসারপারা দুর্বারা দুর্নিরীক্ষ্যা দুরাসদা ।

প্রাণশক্তিঃ প্রাণবিদ্যা যোগিনী পরমা কলা ॥ ১১॥

মহাবিভূতির্দুর্দ্ধর্ষা মূলপ্রকৃতিসংভবা ।

অনাদ্যনন্তবিভবা পরার্থা পুরুষারণিঃ ॥ ১২॥

সর্গস্থিত্যন্তকরণী সুদুর্বাচ্যা দুরত্যযা ।

শব্দযোনিঃ শব্দমযী নাদাখ্যা নাদবিগ্রহা ॥ ১৩॥

প্রধানপুরুষাতীতা প্রধানপুরুষাত্মিকা ।

পুরাণী চিন্ময়ী পুংসামাদিঃ পুরুষরূপিণী ॥ ১৪॥

ভূতান্তরাত্মা কূটস্থা মহাপুরুষসংজ্ঞিতা ।

জন্মমৃত্যুজরাতীতা সর্বশক্তিসমন্বিতা ॥ ১৫॥

ব্যাপিনী চানবচ্ছিন্না প্রধানানুপ্রবেশিনী ।

ক্ষেত্রজ্ঞশক্তিরব্যক্তলক্ষণা মলবর্জিতা ॥ ১৬॥

অনাদিমায়াসংভিন্না ত্রিতত্ত্বা প্রকৃতির্গুহা ।

মহামায়াসমুৎপন্না তামসী পৌরুষী ধ্রুবা ॥ ১৭॥

ব্যক্তাব্যক্তাত্মিকা কৃষ্ণা রক্তা শুক্লা প্রসূতিকা ।

অকার্যা কার্যজননী নিত্যং প্রসবধর্মিণী ॥ ১৮॥

সর্গপ্রলয়নির্মুক্তা সৃষ্টিস্থিত্যন্তধর্মিণী ।

ব্রহ্মগর্ভা চতুর্বিংশা পদ্মনাভাঽচ্যুতাত্মিকা ॥ ১৯॥

বৈদ্যুতী শাশ্বতী যোনির্জগন্মাতেশ্বরপ্রিয়া ।

সর্বাধারা মহারূপা সর্বৈশ্বর্যসমন্বিতা ॥ ২০॥

বিশ্বরূপা মহাগর্ভা বিশ্বেশেচ্ছানুবর্তিনী ।

মহীযসী ব্রহ্মযোনির্মহালক্ষ্মীসমুদ্ভবা ॥ ২১॥

মহাবিমানমধ্যস্থা মহানিদ্রাত্মহেতুকা ।
সর্বসাধারণী সূক্ষ্মা হ্যবিদ্যা পারমার্থিকা ॥ ২২॥

অনন্তরূপাঽনন্তস্থা দেবী পুরুষমোহিনী ।
অনেকাকারসংস্থানা কালত্রযবিবর্জিতা ॥ ২৩॥

ব্রহ্মজন্মা হরের্মূর্তির্ব্রহ্মবিষ্ণুশিবাত্মিকা ।
ব্রহ্মেশবিষ্ণুজননী ব্রহ্মাখ্যা ব্রহ্মসংশ্রযা ॥ ২৪॥

ব্যক্তা প্রথমজা ব্রাহ্মী মহতী জ্ঞানরূপিণী ।
বৈরাগ্যৈশ্বর্যধর্মাত্মা ব্রহ্মমূর্তির্হৃদিস্থিতা ।
অপাংযোনিঃ স্বযংভূতির্মানসী তত্ত্বসংভবা ॥ ২৫॥

ঈশ্বরাণী চ শর্বাণী শংকরার্দ্ধশরীরিণী ।
ভবানী চৈব রুদ্রাণী মহালক্ষ্মীরথাম্বিকা ॥ ২৬॥

মহেশ্বরসমুৎপন্না ভুক্তিমুক্তিফলপ্রদা ।
সর্বেশ্বরী সর্ববন্দ্যা নিত্যং মুদিতমানসা ॥ ২৭॥

ব্রহ্মেন্দ্রোপেন্দ্রনমিতা শংকরেচ্ছানুবর্তিনী ।

ঈশ্বরার্দ্ধাসনগতা মহেশ্বরপতিব্রতা ॥ ২৮॥

সকৃদ্বিভাবিতা সর্বা সমুদ্রপরিশোষিণী ।

পার্বতী হিমবৎপুত্রী পরমানন্দদায়িনী ॥ ২৯॥

গুণাঢ্যা যোগজা যোগ্যা জ্ঞানমূর্তির্বিকাসিনী ।

সাবিত্রী কমলা লক্ষ্মীঃ শ্রীরনন্তোরসি স্থিতা ॥ ৩০॥

সরোজনিলযা মুদ্রা যোগনিদ্রা সুরার্দিনী ।

সরস্বতী সর্ববিদ্যা জগজ্জ্যেষ্ঠা সুমঙ্গলা ॥ ৩১॥

বাগ্দেবী বরদা বাচ্যা কীর্তিঃ সর্বার্থসাধিকা ।

যোগীশ্বরী ব্রহ্মবিদ্যা মহাবিদ্যা সুশোভনা ॥ ৩২॥

গুহ্যবিদ্যাত্মবিদ্যা চ ধর্মবিদ্যাত্মভাবিতা ।

স্বাহা বিশ্বংভরা সিদ্ধিঃ স্বধা মেধা ধৃতিঃ শ্রুতিঃ ॥ ৩৩॥

নীতিঃ সুনীতিঃ সুকৃতির্মাধবী নরবাহিনী ।

অজা বিভাবরী সৌম্যা ভোগিনী ভোগদাযিনী ॥ ৩৪॥

শোভা বংশকরী লোলা মালিনী পরমেষ্ঠিনী ।

ত্রৈলোক্যসুন্দরী রম্যা সুন্দরী কামচারিণী ॥ ৩৫॥

মহানুভাবা সত্ত্বস্থা মহামহিষমর্দনী ।

পদ্মমালা পাপহরা বিচিত্রা মুকুটাননা ॥ ৩৬॥

কান্তা চিত্রাম্বরধরা দিব্যাভরণভূষিতা ।

হংসাখ্যা ব্যোমনিলযা জগৎসৃষ্টিবিবর্দ্ধিনী ॥ ৩৭॥

নির্যন্ত্রা যন্ত্রবাহস্থা নন্দিনী ভদ্রকালিকা ।

আদিত্যবর্ণা কৌমারী মযূরবরবাহিনী ॥ ৩৮॥

বৃষাসনগতা গৌরী মহাকালী সুরার্চিতা ।

অদিতির্নিযতা রৌদ্রী পদ্মগর্ভা বিবাহনা ॥ ৩৯॥

বিরূপাক্ষী লেলিহানা মহাপুরনিবাসিনী ।

মহাফলাঽনবদ্যাঙ্গী কামপূরা বিভাবরী ॥ ৪০॥

বিচিত্ররত্নমুকুটা প্রণতার্তিপ্রভঞ্জনী ।

কৌশিকী কর্ষণী রাত্রিস্ত্রিদশার্ত্তিবিনাশিনী ॥ ৪১॥

বহুরূপা সুরূপা চ বিরূপা রূপবর্জিতা ।

ভক্তার্তিশমনী ভব্যা ভবভাববিনাশিনী ॥ ৪২॥

নির্গুণা নিত্যবিভবা নিঃসারা নিরপত্রপা ।

যশস্বিনী সামগীতির্ভবাঙ্গনিলযালযা ॥ ৪৩॥

দীক্ষা বিদ্যাধরী দীপ্তা মহেন্দ্রবিনিপাতিনী ।

সর্বাতিশাযিনী বিদ্যা সর্বসিদ্ধিপ্রদাযিনী ॥ ৪৪॥

সর্বেশ্বরপ্রিযা তার্ক্ষ্যা সমুদ্রান্তরবাসিনী ।

অকলঙ্কা নিরাধারা নিত্যসিদ্ধা নিরামযা ॥ ৪৫॥

কামধেনুর্বৃহদ্গর্ভা ধীমতী মোহনাশিনী ।

নিঃসঙ্কল্পা নিরাতঙ্কা বিনযা বিনযপ্রদা ॥ ৪৬॥

জ্বালামালা সহস্রাঢ্যা দেবদেবী মনোন্মনী ।

মহাভগবতী দুর্গা বাসুদেবসমুদ্ভবা ॥ ৪৭॥

মহেন্দ্রোপেন্দ্রভগিনী ভক্তিগম্যা পরাবরা ।

জ্ঞানজ্ঞেযা জরাতীতা বেদান্তবিষযা গতিঃ ॥ ৪৮॥

দক্ষিণা দহনা দাহ্যা সর্বভূতনমস্কৃতা ।

যোগমাযা বিভাবজ্ঞা মহামাযা মহীযসী ॥ ৪৯॥

সংধ্যা সর্বসমুদ্ভূতির্ব্রহ্মবৃক্ষাশ্রযানতিঃ ।

বীজাঙ্কুরসমুদ্ভূতির্মহাশক্তির্মহামতিঃ ॥ ৫০॥

খ্যাতিঃ প্রজ্ঞা চিতিঃ সংবিত্ মহাভোগীন্দ্রশায়িনী ।
বিকৃতিঃ শাংকরী শাস্ত্রী গণগন্ধর্বসেবিতা ॥ ৫১॥

বৈশ্বানরী মহাশালা দেবসেনা গুহপ্রিয়া ।
মহারাত্রিঃ শিবানন্দা শচী দুঃস্বপ্ননাশিনী ॥ ৫২ ॥

ইজ্যা পূজ্যা জগদ্ধাত্রী দুর্বিজ্ঞেয়া সুরূপিণী ।
গুহাম্বিকা গুণোৎপত্তির্মহাপীঠা মরুৎসুতা ॥ ৫৩॥

হব্যবাহান্তরাগাদিঃ হব্যবাহসমুদ্ভবা ।
জগদ্যোনির্জগন্মাতা জন্মমৃত্যুজরাতিগা ॥ ৫৪ ॥

বুদ্ধিমাতা বুদ্ধিমতী পুরুষান্তরবাসিনী ।
তরস্বিনী সমাধিস্থা ত্রিনেত্রা দিবি সংস্থিতা ॥ ৫৫ ॥

সর্বেন্দ্রিয়মনোমাতা সর্বভূতহৃদি স্থিতা ।
সংসারতারিণী বিদ্যা ব্রহ্মবাদিমনোলয়া ॥ ৫৬॥

ব্রহ্মাণী বৃহতী ব্রাহ্মী ব্রহ্মভূতা ভবারণিঃ ।
হিরণ্ময়ী মহারাত্রিঃ সংসারপরিবর্ত্তিকা ॥ ৫৭॥

সুমালিনী সুরূপা চ ভাবিনী তারিণী প্রভা ।

উন্মীলনী সর্বসহা সর্বপ্রত্যয়সাক্ষিণী ॥ ৫৮॥

সুসৌম্যা চন্দ্রবদনা তাণ্ডবাসক্তমানসা ।
সত্ত্বশুদ্ধিকরী শুদ্ধির্মলত্রয়বিনাশিনী ॥ ৫৯॥

জগৎপ্রিয়া জগন্মূর্তিস্ত্রিমূর্তিরমৃতাশ্রয়া ।
নিরাশ্রয়া নিরাহারা নিরঙ্কুরবনোদ্ভবা ॥ ৬০॥

চন্দ্রহস্তা বিচিত্রাঙ্গী স্রগ্বিণী পদ্মধারিণী ।
পরাবরবিধানজ্ঞা মহাপুরুষপূর্বজা ॥ ৬১॥

বিদ্যেশ্বরপ্রিয়া বিদ্যা বিদ্যুজ্জিহ্বা জিতশ্রমা ।
বিদ্যাময়ী সহস্রাক্ষী সহস্রবদনাত্মজা ॥ ৬২॥

সহস্ররশ্মিঃ সত্ত্বস্থা মহেশ্বরপদাশ্রয়া ।
ক্ষালিনী সন্ময়ী ব্যাপ্তা তৈজসী পদ্মবোধিকা ॥ ৬৩॥

মহামায়াশ্রয়া মান্যা মহাদেবমনোরমা ।
ব্যোমলক্ষ্মীঃ সিংহরথা চেকিতানাঽমিতপ্রভা ॥ ৬৪॥

বীরেশ্বরী বিমানস্থা বিশোকা শোকনাশিনী ।
অনাহতা কুণ্ডলিনী নলিনী পদ্মবাসিনী ॥ ৬৫॥

সদানন্দা সদাকীর্তিঃ সর্বভূতাশ্রযস্থিতা ।

বাগ্দেবতা ব্রহ্মকলা কলাতীতা কলারণিঃ ॥ ৬৬॥

ব্রহ্মশ্রীর্ব্রহ্মহৃদযা ব্রহ্মবিষ্ণুশিবপ্রিযা ।

ব্যোমশক্তিঃ ক্রিযাশক্তির্জ্ঞানশক্তিঃ পরাগতিঃ ॥ ৬৭॥

ক্ষোভিকা বন্ধিকা ভেদ্যা ভেদাভেদবিবর্জিতা ।

অভিন্নাভিন্নসংস্থানা বংশিনী বংশহারিণী ॥ ৬৮॥

গুহ্যশক্তির্গুণাতীতা সর্বদা সর্বতোমুখী ।

ভগিনী ভগবৎপত্নী সকলা কালকারিণী ॥ ৬৯॥

সর্ববিত্ সর্বতোভদ্রা গুহ্যাতীতা গুহারণিঃ ।

প্রক্রিযা যোগমাতা চ গঙ্গা বিশ্বেশ্বরেশ্বরী ॥ ৭০॥

কপিলা কাপিলা কান্তা কনকাভা কলান্তরা ।

পুণ্যা পুষ্করিণী ভোক্ত্রী পুরংদরপুরস্সরা ॥ ৭১॥

পোষণী পরমৈশ্বর্যভূতিদা ভূতিভূষণা ।

পঞ্চব্রহ্মসমুৎপত্তিঃ পরমার্থার্থবিগ্রহা ॥ ৭২॥

ধর্মোদযা ভানুমতী যোগিজ্ঞেযা মনোজবা ।

মনোহরা মনোরক্ষা তাপসী বেদরূপিণী ॥ ৭৩॥

বেদশক্তির্বেদমাতা বেদবিদ্যাপ্রকাশিনী ।

যোগেশ্বরেশ্বরী মাতা মহাশক্তির্মনোমযী ॥ ৭৪॥

বিশ্বাবস্থা বিযন্মূর্ত্তির্বিদ্যুন্মালা বিহাযসী ।

কিংনরী সুরভী বন্দ্যা নন্দিনী নন্দিবল্লভা ॥ ৭৫॥

ভারতী পরমানন্দা পরাপরবিভেদিকা ।

সর্বপ্রহরণোপেতা কাম্যা কামেশ্বরেশ্বরী ॥ ৭৬॥

অচিন্ত্যাঽচিন্ত্যবিভবা হৃল্লেখা কনকপ্রভা ।

কূষ্মাণ্ডী ধনরত্নাঢ্যা সুগন্ধা গন্ধদাযিনী ॥ ৭৭॥

ত্রিবিক্রমপদোদ্ভূতা ধনুষ্পাণিঃ শিবোদযা ।

সুদুর্লভা ধনাধ্যক্ষা ধন্যা পিঙ্গললোচনা ॥ ৭৮॥

শান্তিঃ প্রভাবতী দীপ্তিঃ পঙ্কজাযতলোচনা ।

আদ্যা হৃৎকমলোদ্ভূতা গবাং মাতা রণপ্রিযা ॥ ৭৯॥

সৎক্রিযা গিরিজা শুদ্ধা নিত্যপুষ্টা নিরন্তরা ।

দুর্গাকাত্যাযনী চণ্ডী চর্চিকা শান্তবিগ্রহা ॥ ৮০॥

হিরণ্যবর্ণা রজনী জগদ্যন্ত্রপ্রবর্তিকা ।
মন্দরাদ্রিনিবাসা চ শারদা স্বর্ণমালিনী ॥ ৮১॥

রত্নমালা রত্নগর্ভা পৃথ্বী বিশ্বপ্রমাথিনী ।
পদ্মাননা পদ্মনিভা নিত্যতুষ্টাঽমৃতোদ্ভবা ॥ ৮২ ॥

ধুন্বতী দুঃপ্রকম্প্যা চ সূর্যমাতা দৃষদ্বতী ।
মহেন্দ্রভগিনী মান্যা বরেণ্যা বরদর্পিতা ॥ ৮৩॥

কল্যাণী কমলা রামা পঞ্চভূতা বরপ্রদা ।
বাচ্যা বরেশ্বরী বন্দ্যা দুর্জযা দুরতিক্রমা ॥ ৮৪ ॥

কালরাত্রির্মহাবেগা বীরভদ্রপ্রিযা হিতা ।
ভদ্রকালী জগন্মাতা ভক্তানাং ভদ্রদাযিনী ॥ ৮৫॥

করালা পিঙ্গলাকারা নামভেদাঽমহামদা ।
যশস্বিনী যশোদা চ ষডধ্বপরিবর্ত্তিকা ॥ ৮৬॥

শঙ্খিনী পদ্মিনী সাংখ্যা সাংখ্যযোগপ্রবর্তিকা ।
চৈত্রা সংবৎসরারূঢা জগৎসংপূরণীন্দ্রজা ॥ ৮৭॥

শুম্ভারিঃ খেচরী স্বস্থা কম্বুগ্রীবা কলিপ্রিযা ।

খগধ্বজা খগারূঢা পরার্ধ্যা পরমালিনী ॥ ৮৮॥

ঐশ্বর্যবর্ত্মনিলযা বিরক্তা গরুডাসনা ।

জযন্তী হৃদ্গুহা রম্যা গহ্বরেষ্ঠা গণাগ্রণীঃ ॥ ৮৯॥

সংকল্পসিদ্ধা সাম্যস্থা সর্ববিজ্ঞানদাযিনী ।

কলিকল্মষহন্ত্রী চ গুহ্যোপনিষদুত্তমা ॥ ৯০॥

নিষ্ঠা দৃষ্টিঃ স্মৃতির্ব্যাপ্তিঃ পুষ্টিস্তুষ্টিঃ ক্রিযাবতী ।

বিশ্বামরেশ্বরেশানা ভুক্তির্মুক্তিঃ শিবাঽমৃতা ॥ ৯১॥

লোহিতা সর্পমালা চ ভীষণী বনমালিনী ।

অনন্তশযনাঽনন্যা নরনারাযণোদ্ভবা ॥ ৯২॥

নৃসিংহী দৈত্যমথনী শঙ্খচক্রগদাধরা ।

সংকর্ষণসমুৎপত্তিরম্বিকাপাদসংশ্রযা ॥ ৯৩॥

মহাজ্বালা মহামূর্ত্তিঃ সুমূর্ত্তিঃ সর্বকামধুক্ ।

সুপ্রভা সুস্তনা গৌরী ধর্মকামার্থমোক্ষদা ॥ ৯৪॥

ভ্রূমধ্যনিলযা পূর্বা পুরাণপুরুষারণিঃ ।

মহাবিভূতিদা মধ্যা সরোজনযনা সমা ॥ ৯৫॥

অষ্টাদশভুজাঽনাদ্যা নীলোৎপলদলপ্রভা ।

সর্বশক্ত্যাসনারূঢা ধর্মাধর্মার্থবর্জিতা ॥ ৯৬॥

বৈরাগ্যজ্ঞাননিরতা নিরালোকা নিরিন্দ্রিযা ।

বিচিত্রগহনাধারা শাশ্বতস্থানবাসিনী ॥ ৯৭॥

স্থানেশ্বরী নিরানন্দা ত্রিশূলবরধারিণী ।

অশেষদেবতামূর্ত্তির্দেবতা বরদেবতা ।

গণাম্বিকা গিরেঃ পুত্রী নিশুম্ভবিনিপাতিনী ॥ ৯৮॥

অবর্ণা বর্ণরহিতা নিবর্ণা বীজসংভবা ।

অনন্তবর্ণাঽনন্যস্থা শংকরী শান্তমানসা ॥ ৯৯॥

অগোত্রা গোমতী গোপ্ত্রী গুহ্যরূপা গুণোত্তরা ।

গৌর্গীর্গব্যপ্রিযা গৌণী গণেশ্বরনমস্কৃতা ॥ ১০০॥

সত্যমাত্রা সত্যসংধা ত্রিসংধ্যা সংধিবর্জিতা ।

সর্ববাদাশ্রযা সংখ্যা সাংখ্যযোগসমুদ্ভবা ॥ ১০১॥

অসংখ্যেযাঽপ্রমেযাখ্যা শূন্যা শুদ্ধকুলোদ্ভবা ।

বিন্দুনাদসমুৎপত্তিঃ শংভুবামা শশিপ্রভা ॥ ১০২॥

বিসঙ্গা ভেদরহিতা মনোজ্ঞা মধুসূদনী ।

মহাশ্রীঃ শ্রীসমুৎপত্তিস্তমঃপারে প্রতিষ্ঠিতা ॥ ১০৩॥

ত্রিতত্ত্বমাতা ত্রিবিধা সুসূক্ষ্মপদসংশ্রয়া ।

শান্ত্যতীতা মলাতীতা নির্বিকারা নিরাশ্রয়া ॥ ১০৪ ॥

শিবাখ্যা চিত্তনিলয়া শিবজ্ঞানস্বরূপিণী ।

দৈত্যদানবনির্মাত্রী কাশ্যপী কালকল্পিকা ॥ ১০৫॥

শাস্ত্রযোনিঃ ক্রিয়ামূর্তিশ্চতুর্বর্গপ্রদর্শিকা ।

নারায়ণী নরোদ্ভূতিঃ কৌমুদী লিঙ্গধারিণী ॥ ১০৬॥

কামুকী ললিতা ভাবা পরাপরবিভূতিদা ।

পরান্তজাতমহিমা বডবা বামলোচনা ॥ ১০৭॥

সুভদ্রা দেবকী সীতা বেদবেদাঙ্গপারগা ।

মনস্বিনী মন্যুমাতা মহামন্যুসমুদ্ভবা ॥ ১০৮॥

অমৃত্যুরমৃতা স্বাহা পুরুহূতা পুরুষ্টুতা ।

অশোচ্যা ভিন্নবিষয়া হিরণ্যরজতপ্রিয়া ॥ ১০৯॥

হিরণ্যা রাজতী হৈমী হেমাভরণভূষিতা ।

বিভ্রাজমানা দুর্জ্ঞেয়া জ্যোতিষ্টোমফলপ্রদা ॥ ১১০॥

মহানিদ্রাসমুদ্ভূতিরনিদ্রা সত্যদেবতা ।

দীর্ঘা ককুদ্মিনী হৃদ্যা শান্তিদা শান্তিবর্দ্ধিনী ॥ ১১১॥

লক্ষ্ম্যাদিশক্তিজননী শক্তিচক্রপ্রবর্তিকা ।

ত্রিশক্তিজননী জন্যা ষড়ূর্মিপরিবর্জিতা ॥ ১১২॥

সুধামা কর্মকরণী যুগান্তদহনাত্মিকা ।

সংকর্ষণী জগদ্ধাত্রী কামযোনিঃ কিরীটিনী ॥ ১১৩॥

ঐন্দ্রী ত্রৈলোক্যনমিতা বৈষ্ণবী পরমেশ্বরী ।

প্রদ্যুম্নদয়িতা দান্তা যুগ্মদৃষ্টিস্ত্রিলোচনা ॥ ১১৪॥

মদোৎকটা হংসগতিঃ প্রচণ্ডা চণ্ডবিক্রমা ।

বৃষাবেশা বিয়ন্মাতা বিন্ধ্যপর্বতবাসিনী ॥ ১১৫॥

হিমবন্মেরুনিলয়া কৈলাসগিরিবাসিনী ।

চাণূরহন্তৃতনয়া নীতিজ্ঞা কামরূপিণী ॥ ১১৬॥

বেদবিদ্যাব্রতস্নাতা ধর্মশীলাঽনিলাশনা ।

বীরভদ্রপ্রিয়া বীরা মহাকালসমুদ্ভবা ॥ ১১৭॥

বিদ্যাধরপ্রিয়া সিদ্ধা বিদ্যাধরনিরাকৃতিঃ ।

আপ্যায়নী হরন্তী চ পাবনী পোষণী খিলা ॥ ১১৮॥

মাতৃকা মন্মথোদ্ভূতা বারিজা বাহনপ্রিয়া ।

করীষিণী সুধাবাণী বীণাবাদনতৎপরা ॥ ১১৯॥

সেবিতা সেবিকা সেব্যা সিনীবালী গুরুত্মতী ।

অরুন্ধতী হিরণ্যাক্ষী মৃগাঙ্কা মানদায়িনী ॥ ১২০॥

বসুপ্রদা বসুমতী বসোর্দ্ধারা বসুংধরা ।

ধারাধরা বরারোহা বরাবরসহস্রদা ॥ ১২১॥

শ্রীফলা শ্রীমতী শ্রীশা শ্রীনিবাসা শিবপ্রিয়া ।

শ্রীধরা শ্রীকরী কল্যা শ্রীধরার্দ্ধশরীরিণী ॥ ১২২॥

অনন্তদৃষ্টিরক্ষুদ্রা ধাত্রীশা ধনদপ্রিয়া ।

নিহন্ত্রী দৈত্যসঙ্ঘানাং সিংহিকা সিংহবাহনা ॥ ১২৩॥

সুষেণা চন্দ্রনিলয়া সুকীর্তিশ্ছিন্নসংশয়া ।

রসজ্ঞা রসদা রামা লেলিহানাঽমৃতস্রবা ॥ ১২৪॥

নিত্যোদিতা স্বয়ংজ্যোতিরুৎসুকা মৃতজীবনী ।

বজ্রদণ্ডা বজ্রজিহ্বা বৈদেহী বজ্রবিগ্রহা ॥ ১২৫॥

মঙ্গল্যা মঙ্গলা মালা মলিনা মলহারিণী ।
গান্ধর্বী গারুডী চান্দ্রী কম্বলাশ্বতরপ্রিয়া ॥ ১২৬॥

সৌদামিনী জনানন্দা ভ্রুকুটীকুটিলাননা ।
কর্ণিকারকরা কক্ষ্যা কংসপ্রাণাপহারিণী ॥ ১২৭॥

যুগংধরা যুগাবর্ত্তা ত্রিসংধ্যা হর্ষবর্দ্ধনী ।
প্রত্যক্ষদেবতা দিব্যা দিব্যগন্ধা দিবাপরা ॥ ১২৮॥

শক্রাসনগতা শাক্রী সাধ্বী নারী শবাসনা ।
ইষ্টা বিশিষ্টা শিষ্টেষ্টা শিষ্টাশিষ্টপ্রপূজিতা ॥ ১২৯॥

শতরূপা শতাবর্ত্তা বিনতা সুরভিঃ সুরা ।
সুরেন্দ্রমাতা সুদ্যুম্না সুষুম্না সূর্যসংস্থিতা ॥ ১৩০॥

সমীক্ষ্যা সৎপ্রতিষ্ঠা চ নিবৃত্তির্জ্ঞানপারগা ।
ধর্মশাস্ত্রার্থকুশলা ধর্মজ্ঞা ধর্মবাহনা ॥ ১৩১॥

ধর্মাধর্মবিনির্মাত্রী ধার্মিকাণাং শিবপ্রদা ।
ধর্মশক্তির্ধর্মময়ী বিধর্মা বিশ্বধর্মিণী ॥ ১৩২॥

ধর্মান্তরা ধর্মমেঘা ধর্মপূর্বা ধনাবহা ।

ধর্মোপদেষ্ট্রী ধর্মাত্মা ধর্মগম্যা ধরাধরা ॥ ১৩৩॥

কাপালী শাকলা মূর্ত্তিঃ কলা কলিতবিগ্রহা ।

সর্বশক্তিবিনির্মুক্তা সর্বশক্ত্যাশ্রয়াশ্রয়া ॥ ১৩৪ ॥

সর্বা সর্বেশ্বরী সূক্ষ্মা সুসূক্ষ্মা জ্ঞানরূপিণী ।

প্রধানপুরুষেশেশা মহাদেবৈকসাক্ষিণী ।

সদাশিবা বিযন্মূর্ত্তির্বিশ্বমূর্ত্তিরমূর্ত্তিকা ॥ ১৩৫ ॥

এবং নাম্নাং সহস্রেণ স্তুত্বাঽসৌ হিমবান্ গিরিঃ ।

ভূয়ঃ প্রণম্য ভীতাত্মা প্রোবাচেদং কৃতাঞ্জলিঃ ॥ ১ ॥

যদেতদৈশ্বরং রূপং ঘোরং তে পরমেশ্বরি ।

ভীতোঽস্মি সাম্প্রতং দৃষ্ট্বা রূপমন্যত্ প্রদর্শয ॥ ২ ॥

এবমুক্তাঽথ সা দেবী তেন শৈলেন পার্বতী ।

সংহৃত্য দর্শযামাস স্বরূপমপরং পুনঃ ॥ ৩॥

নীলোৎপলদলপ্রখ্যং নীলোৎপলসুগন্ধিকম্ ।

দ্বিনেত্রং দ্বিভুজং সৌম্যং নীলালকবিভূষিতম্ ॥ ৪ ॥

রক্তপাদাম্বুজতলং সুরক্তকরপল্লবম্ ।

শ্রীমদ্ বিশালসংবৃত্তললাটতিলকোজ্জ্বলম্ ॥ ৫॥

ভূষিতং চারুসর্বাঙ্গং ভূষণৈরতিকোমলম্ ।

দধানমুরসা মালাং বিশালাং হেমনির্মিতাম্ ॥ ৬॥

ঈষৎস্মিতং সুবিম্বোষ্ঠং নূপুরারাবসংযুতম্ ।

প্রসন্নবদনং দিব্যমনন্তমহিমাস্পদম্ ॥ ৭॥

তদীদৃশং সমালোক্য স্বরূপং শৈলসত্তমঃ ।

ভীতিং সংত্যজ্য হৃষ্টাত্মা বভাষে পরমেশ্বরীম্ ॥ ৮॥

॥ ইতি শ্রীকূর্মপুরাণে পার্বতী সহস্রনাম স্তোত্রম্ সম্পূর্ণম্ ॥

Encoded and proofread by Kirk WOrtman kirkwort@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

% Language : Sanskrit
% Subject : hinduism/religion
% Transliterated by : Kirk Wortman"
% Proofread by : Kirk Wortman"
% Description-comments : skandapuraaNa
% Latest update : August 13, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website